Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 1 | ISSN : 2582-0095

# गुणविमर्शः



**इन्दलः**
**पूर्वशोधच्छात्रः,**
**बी0आर0डी0बी0डी0पी0जी0कॉलेज,**
**आश्रमबरहजः, देवरिया, उत्तरप्रदेशः,भारतः।**

---

**शोधसारांशः** –शब्दार्थगुण न केवलं नाम्ना पार्थक्यमपितु लक्षणेनापि पार्थक्यमस्ति। परमत्रैतदवश्यमङ्गीकर्तव्यं यद्वामनादिभिः स्वीकृताः गुणाः शब्दार्थयोरेवधर्माः। विश्वनाथादिभिश्चाङ्गीकृता रसधर्माः। अर्थगुणेषु च क्रमकौटिल्यानु लवणत्वयोगरूपघटना श्लेषा विचित्रता मात्रमेव नतु कश्चित्पृथक् गुणः। अर्थवैमत्यं प्रसादोऽपुष्टधित्वदोषाभाव एव। माधुर्य मुक्तिवैचिञ्ये माधुर्यमनवीकृदोषाभाव एव। वस्तुस्वभाव स्फुटत्वमर्थव्यक्तिः स्वभावोकत्यलङ्कारेऽन्तर्भवति।

**मुख्यशब्दः**–गुणः, रसः,शब्दः,अर्थः, काव्यशास्त्रः, लक्षणः,श्लेषः।

---

काव्यस्य शब्दार्थौ शरीरं रसादिश्चात्मा, गुणः शौर्यादिवत्, दोषाः काणत्वादिवत्, रीतयोऽवयवसंस्थान विशेषवत्,अलंकाराः,कटककुण्डललादिवत्,इति विश्वनाथेन साहित्यदर्पणे 'काव्यपरिमाणा'प्रकरणे उक्तं तदत्र प्रतिभाति। यथा शौर्यसौजन्यविनयादयो गुणाः शरीराच्छन्नाः प्रधानात्मनि विद्यमानास्तमेव प्रधानमात्मान मुत्कर्षयन्ति नत्वप्रधानं शरीरम्। तथैव माधुर्यादयो गुणाः रसस्थाः सन्तः काव्ये आत्मस्थानीयान् शृंगारदीन् रसान् प्रगुणीकुर्वन्ति, न शब्दार्शौ। यथा कनककुण्डलादयः शरीरे विद्यमाना अलंकाराः शरीरद्वारेण आत्मानमुत्कर्षयन्ति, तथैवानुप्रसादयोऽलंकाराः शब्दार्थौ भूषयन्तः काव्यस्य आत्मभूतं रसं पारम्पर्य सम्बन्धेनोत्कर्षयान्ति। अनेन स्पष्टमेव प्रतिभाति यद्गुणाः अलंकारापेक्षया रसस्य महत्वं नितरां प्रकाशयन्ते। गुणत्व हि नाम–''रसोत्कर्ष प्रयोजकत्व विशिष्ट रसादि मात्रवृत्तित्वं हि नाम गुणत्वमिति'' ।[1] मम्मटस्तु

**रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः।**
**उत्कर्षहेतवस्ते स्युतरचलस्थितयो गुणाः।।[2]**

विश्वनाथोऽपि–

**रसस्याङ्गित्वमाप्तस्य धर्माः शौर्यादयो यथा गुणाः।[3]**

ध्वन्यालोके च–

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अंगाश्रितास्त्वलंकारा मन्तव्याः कटकादिवत्।।[4]**

इत्यंगीकरोत्यानन्दवर्धनाचार्यः तेन च रसोत्कर्षत्वे सति रसधर्मत्वं गुणत्वमिति फलितार्थः।येन च रसत्वे स्थायित्वे रसदोषेषु नातिव्यप्तिः तेषां रसोत्कर्षाभावात्।

परं प्राचामाचार्याणां तु नेयं विचारधारा। तेषां मते तु गुणा रसस्य धर्मा न भवितुमर्हत्ति, अपितु शब्दार्थयोरेव धर्मा भवितुमर्हन्ति। न केवलं लक्षणविषय एव प्राचामाचार्याणां वैमत्यमपि तु संख्यविषयेऽपि नैक्यम्।

तद्यथा–मम्मटविश्वनाथादयः केवलमोजः प्रसादं माधुर्य च गुणत्रयं स्वीकुर्वन्ति। **माधुर्योजः प्रसादाख्या स्रयस्ते न पुनर्दशः**। परं दण्डिवामनदयो दशशब्दगुणान् दशैव चार्थगुणान् आमनन्ति। यथा–

**श्लेषप्रसादः समता माधुर्यं सुकुमारता।**

**अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः।।**[5]

इत्येते शब्दगुणा एवार्थगुणा भवन्ति। शब्दार्थगुण न केवलं नाम्ना पार्थक्यमपितु लक्षणेनापि पार्थक्यमस्ति। परमत्रैतदवश्यमङ्गीकर्तव्यं यद्वामनादिभिः स्वीकृताः गुणाः शब्दार्थयोरेवधर्माः। विश्वनाथादिभिश्चाङ्गीकृता रसधर्माः। अतो विश्वनाथादिभिः स्वीकृतेषु गुणेषु आत्मधर्मत्वात् कथं शरीराङ्गभूतानां वामनादिभिः स्वीकृतानां शब्दार्थधर्मजातानां गुणानामन्तर्भवः सम्भवेत्? '**तत्र गुणवृत्याः पुनस्तेषां वृत्तिः शब्दार्थयोर्मित**'[5] इति नियमेन परम्परया शब्दार्थयोरपि धर्मत्वेन स्वीकृतेषु माधुर्यौजः प्रसादेष्वेव वामनादिभिः स्वीकृत दशगुणानाम़न्त्रर्भावः सुशकः। न तु साक्षात्सम्बन्धेन स्वीकृतेषु काव्यात्मभूत रसस्य धर्मेषु एवान्तर्भावो भवति।

प्राचीनाचार्य स्वीकृता दशगुणाः श्लेषप्रसादौजः सु अन्तर्भूताः। मार्गभेद स्वरूपिणी समता न गुणत्वमंगीकरोति,अपितु क्वचिद्दोष एव। पृथक्पदत्वं माधुर्यमवन्तभूतम्। विकटत्वपदानां नृत्य प्रायत्व मुदारता ओजस्यन्तर्भूता। पदानां झटिति अर्थसमर्पणमर्थव्यक्तिः प्रसदेऽन्तर्भवति। अपारुष्यलक्षणलक्षिता सुकुमारिता दुःश्रवतात्यागेनैवाङ्गी क्रियते। बन्धवेकटय लक्षण लक्षितमोज ओजस्यन्तर्भवति। औज्वल्यरुप कान्तिः ग्राम्यत्वभावरूपैव। आरोहावरोहक्रमुयुक्तः समाधिरोजसि एवान्तर्भवति। इत्येवं नास्ति शब्दगुणानां न्यूनाधिकसंख्या। अपितु त्रय एव गुणाः सन्ति। अर्थगुणेषु च क्रमकौटिल्यानु लवणत्वयोगरूपघटना श्लेषा विचित्रता मात्रमेव नतु कश्चित्पृथक् गुणः। अर्थवैमत्यं प्रसादोऽपुष्टधित्वदोषाभाव एव। माधुर्य मुक्तिवैचिञ्ये माधुर्यमनवीकृदोषाभाव एव। वस्तुस्वभाव स्फुटत्वमर्थव्यक्तिः स्वभावोकत्यलङ्कारेऽन्तर्भवति। अपारुष्यं सुकुमारताऽमंगलाऽश्लीलत्वत्यागरूपैव। साभिप्रायत्वतमोजोऽपुष्टार्थत्व –दोषाभावेऽन्तभूर्तम्।दीप्तरसत्वं कान्तिर्ध्वनि गुणीभूत व्यंगययोरन्तर्भूता भवति। अदृष्टरूपोऽयोनि रूपच्छाया योनोश्चेति द्विविधः। समाधिरर्थदृष्टिरेव न गुणः एवमाधुनिकाचार्याणां मते त्रय एव गुणा न तु विशंतिः। उक्तमपि–

**केचिदन्तर्भवत्त्येषु दोषत्यागात् परे श्रिताः।**

**अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दशः।।**[6]

तेषु माधुर्यौजः प्रसादेषु माधुर्यस्य लक्षणं मम्मटेनोक्तम्।

**आह्लादकत्वं माधुर्यं शृंगारे द्रुतिकारणम्।**

**करुणो विप्रलम्भे तच्छान्ते चातिशयान्वितम्।।**[7]

शृंगारकरुणशान्त रसेद्बोधनान्तरं जायमानो रत्यादिविषयक्तःसहृदयः चित्तद्रवीभावरूपः केवलानन्दसन्दोहनुभवो माधुर्यम्। तच्च माधुर्य शृंगारे रसन्तरापेक्षया चमत्कृतिमावहति। तदुक्तं ध्वन्यालोके–

**शृंगार एव मधुरः परः प्रह्लानो रसः।**

**माधुर्यमाद्रतां याति यतस्तत्राधिकं मनः।।**[8]

सम्भोगापेक्षया विप्रलम्भा शृंगार करूणयोरेव माधुर्यमुत्तरोत्कर्ष प्रकर्षवत्प्रतिभाति। तथापि 'करुणो विप्रलम्भे तच्छान्ते चातिशयान्वितम्' इति काव्यप्रकाशकारस्योक्तिर्न केनाप्यपाक्रियते। उदाहरणं च यथा–

**लताकुञ्जं गुञ्जन्मदवलिपुञ्जं चयलयन्–**

**समालिंगन्नंग द्रुततरमनंग प्रबलयन्।**

**मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्–**

**रजोवृन्दविन्दन् किरति मकरन्दं दिशि दिशी।।**[9]

ओजो लक्षणम् "**दीप्त्यात्मविस्मृते हेतुरोजो वीररसस्थिति**"[10] रित्यभिहिततम्। तत्र दीप्तिर्नाम ज्वलितत्वमिव चित्तस्य विस्तारात्मा वृत्ति विषेषस्तञजनको गुणः ओजः। तथा च यद् वशाञ्वलितमिव मनो जायते, तदोज इति फलितम् वीरबीभल्त्सरोद्रेषूचरोतरमोजसाधिक्यं भवतीति निश्चितः पन्थाः। उक्तं काव्यप्रकाशे–'बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेणश्च'[11]। इति ध्वन्यालोके च रौद्रवीराद्भुतेषु दीप्तिजनकतया ओजस उक्तर्षाधायकत्वमुक्तम्। यथोक्तमपि–

**रौद्रादयो रसा दीप्त्या लक्ष्यन्ते काव्यवर्तिनः।**

**तद्व्यक्तिहेतू शब्दर्थावाश्रित्योजो व्यवस्थितम्।।**[12]

यथाग्निः शुष्कमिन्धनं सहसैव व्याप्नोति, यथावा जलं स्वच्छे पटं झटित्येव व्याप्नोति तथैव यो गुणश्चितं सहसैव व्याप्नोति स प्रसादनामधेयः । यथाक्ते साहित्यदर्पणे–

**'चित्त व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।**

**स प्रसादः समस्तेषु रसेषु रचनासु च ।।[13]**

ध्वन्यालोके च–

**समर्पकत्वं काव्यस्य यत्तु सर्वरसान्प्रति।**

**स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः।।[14]**

अत एव काव्ये गुणानामव्यभिचारित्वज्ञापनाय प्रसादगुणानिरूपणावसरे प्राचीनैरूक्तम्–

**स च सर्वरसव्यापी काव्यजीवातुरिष्यते।।**

**एवं कृते विवेचने काव्ये गुणनां औचित्यं स्वीक्रियते।।[15]**

**सन्दर्भग्रन्थाः–**


1.काव्यप्रकाशः, भूमिकायाम् पृ0121

2.काव्यप्रकाशे 8.2

3.साहित्यदर्पणे 8.1

4.ध्वन्यालोके 2.6

5.काव्यादर्शः पृ0 210

6.काव्यप्रकशे 8.2

7.काव्यादर्शः पृ0 241

8.काव्यप्रकाशे 8.3

9.काव्यप्रकाशे 8.4

10.ध्वन्यालेके 2.16

11.साहित्यदर्पणे पृ0 421

12.काव्यप्रकशः 8.4

13.काव्यप्रकशः 8.5

14. साहित्यदपणे 8.7

15. ध्वन्योलोके 2.8

16. काव्यशास्त्र का इतिहास पृ0 631